# संस्कृतवार्ता:

**दिनाङ्क : 02/09/2025** **सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् विश्वं भारतदेशोऽपरि विश्वसिति। सहैव भारतेन सह सेमीकंडक्टर-क्षेत्रे भविष्यनिर्माणार्थमापि औत्सुक्यमावहति।
- वैश्विक-आर्थिक-स्वार्थे सत्यपि भारतं सप्त दशमलव अष्ट प्रतिशतं यावत् वृद्धिं प्राप्नोत् इति प्रधानमन्त्री अवदत्।
- सूडानस्य पश्चिम-दारपुरक्षेत्रे दुरापन्नेन भीषण-भूकम्पेन कश्चन पर्वतीयग्रामः नष्टभ्रष्टः समजायत।
- भारतीय-ऋतु-विज्ञान-विभागेन आगामिषु चतुर्विंशतिः होरासु उत्तराखण्डे कश्मीरे च अतिवृष्टेः पूर्वानुमानं प्रकटितम् । सममेव पंजाब राज्यस्य कृते रेड अलर्ट इति संचेतना प्रकटिता।

**प्रधानमन्त्री-सेमीकंडक्टर**

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् विश्वं भारतदेशोऽपरि विश्वसिति। सहैव भारतेन सह सेमीकंडक्टर-क्षेत्रे भविष्यनिर्माणार्थमापि औत्सुक्यमावहति। अद्य नवदिल्ल्याः यशोभूम्यां पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य सेमीकॉन-इण्डिया इत्याख्यस्य अधिवेशनस्य उद्घाटनावसरे श्रीमोदिना प्रोदीरितं यत् तद्दिनं नातिदूरं यदा भारतस्य लघुतम-चिप्-यन्त्रं जगति महद्परिवर्तनं आनेष्यति।

प्रधानमन्त्री अवोचत् यत्र कस्मिन्श्चित् काले तैलं कृष्णसुवर्ण-नाम्ना प्रख्यातं तत्राद्य चिप्-यन्त्राणि डिजिटल-हीरकाणि सन्ति।

प्रधानमन्त्रिणा कथितं यत् एकविंशत्यधिक-द्विसहस्रतम-वर्षात् स्वीकृतासु दश-सेमीकंडक्टर-परियोजनासु अष्टादश-अरब-डॉलरमितात्मकः निवेशः प्रवर्तते । सहैव आगामिकाले वैश्विक-सेमिकंडक्टर-विपणिः ट्रिलियन-डॉलरमितात्मकं परिमाणं अतिक्रम्येत। असौ प्रोदीरितवान् यत् दुर्लभ-खनिजानां आवश्यकतां पूरयितुं महत्त्वपूर्ण-खनिजाभियानान्यपि भारतं सम्पादयति।

प्रथम-त्रैमासिकस्य सकल-आन्तरिकोत्पादस्य प्रदत्तानां विषये विवृण्वन् श्रीमोदी कथितवान् यत् भारतेन पुनरेकवारं अचिन्तनीय-प्रदर्शनं कृतम्।

सूचना-प्रौद्योगिकीमन्त्री अश्विनी-वैष्णवः कार्यक्रमं सम्बोधयन् प्रोक्तवान् यत् भारतं सेमीकंडक्टर-अभियानस्य आरम्भानन्तरं सम्पूर्णविश्वं विश्वासेन सह भारतम् अवलोकते।

त्रिदिवसात्मकस्यास्य सम्मेलनस्य उद्देश्यं भारतस्य सेमीकंडक्टर-क्षेत्राय गतिप्रदानम् इत्यस्ति।

**पीएम जीविका निधि**

प्रधानमन्त्री नरेन्द्र मोदी इत्यनेन अद्य बिहारराज्यजीविका निधि-साख-सहकारी संघ लिमिटेड इत्यस्य आभासीयमाध्यमेन उद्घाटनं कृतम्। जीविका निधिः जीविकया सह सम्बद्धानां समुदायसदस्यानां कृते सुलभतया अल्पेषु ऋणेषु धनं प्रदातुं लक्ष्यति।

प्रधानमन्त्रिणा पंचाधिकैकशतरूप्यकाणि संस्थायाः वित्तकोषे स्थानन्तरितानि। अस्मिन् अवसरे सः अब्रवीत् यत् अनया योजनया राज्यस्य ग्रामीणमहिलाः उद्यमिनः इदानीं सुलभतया धनं प्राप्स्यन्ति। श्री मोदी अवदत् यत् एषा आर्थिकसाहाय्यं तासां व्यवसायम् अधिकं वर्धयिष्यति। प्रधानमन्त्रिणा उक्तं यत् भारतस्य विकासः महिलानां सशक्तिकरणे अस्ति।

**सूडान-भूकम्पः**

सूडानस्य पश्चिम-दारपुरक्षेत्रे दुरापन्नेन भीषण-भूकम्पेन कश्चन पर्वतीयग्रामः नष्टभ्रष्टः समजायत। एतस्मिन् सहस्त्रजनाः अपमृत्युं अवाप्नुवन् केवलं एकः जनः अवशिष्टः । अनवरतं अनुवर्तमानवृष्ट्या इयं दुर्घटना समापतिता अनेन मार्रापर्वतेषु स्थितः तरासीन-ग्रामः विनष्टो जातः। सूडान-लिबरेशन-मूवमेंट इत्यनेन प्रारम्भिक-सूचनायां कथितं यत् ग्रामस्य समेऽपि जनाः मृत्युमुपगताः येषां संख्या आहत्य एकसहस्रं यावत् वर्तते।

**स्टार्क-टीविंशति-संन्यासः**

आस्ट्रेलियादेशीयः तीव्रकन्दुक-प्रक्षेपकः मिशेल-स्टार्क इत्येषः अद्य विंशति-प्रतिविंशतिः अन्ताराष्ट्रिय-क्रिकेटक्रीडातः सन्न्यासं उद्घोषयत् । असौ प्रोक्तवान् यत् सः टेस्टक्रीडायां वनडे-क्रीडायाञ्च ध्यानं केन्द्रयितुमिच्छति । स्टार्क इत्येषः टी-विंशतिप्रारूपे आस्ट्रेलियादले स्तोभग्राहकत्वेन द्वितीयं स्थानं भजते । द्वादशोत्तर-द्विसहस्त्रतमे वर्षे पाकिस्तानं विरुध्य पञ्चषष्टिक्रीडासु स्टार्क इत्यमुना एकोनशीतिः स्तोभाः निगृताः । अतः परं क्रीडितासु षड्-विश्वचषक-प्रतिस्पर्धासु पञ्चस्पर्धायां अनेन भागः स्वीकृतः। एकस्मिन् संस्करणे तावत् व्रणितत्वात् एषः क्रीडातः बहिस्स्थितः।

**जम्मू-कश्मीर-अभियानम्**

जम्मू-कश्मीरे सुरक्षाबलेन अद्य पुंछ-जनपदस्य कतिचिद्ग्रामेषु संयुक्त-बन्धनान्वेषणम् समारब्धम्। केषाञ्चन संदिग्धव्यक्तीनां गतिविधेः विशेषसूचनानन्तरं अन्वेषणाभियानमिदम् आरभत । अत्रान्तरे पञ्जाबस्य आरक्षिदलेन जम्मूकश्मीरतः जैश-ए-मोहम्मद इत्याख्येन सम्बद्धौ द्वौ भ्रातरौ निगडितौ तयोश्च सहयोगी-मित्रमपि निगृहीतः। उभावपि भ्रातरौ जैश-ए-मोहम्मद-समूहस्य गुप्तसमर्थकौ वर्तेते । तौ मोहाली-नगरे कैब-चालकस्य अपहरणे हत्यायाञ्चापि संलग्नौ आस्ताम् ।

**ऋतु-विज्ञान-विभागः**

भारतीय-ऋतु-विज्ञान-विभागेन नव दिल्लां अतिवृष्टेः कारणात् येलो अलर्ट इति संचेतना प्रकटिता। विभागेनानेन आगामिषु चतुर्विंशतिः होरासु उत्तराखण्डे कश्मीरे च अतिवृष्टेः पूर्वानुमानं प्रकटितम्। सममेव रेड अलर्ट इति संचेतना च प्रकटिता।

**एस जयशङ्करः**

विदेशमन्त्री डा० एस जयशङ्करः वियतनामदेशस्य राष्ट्रियदिवसस्य अशीतितमे वार्षिकी-अवसरे वियतनामदेशस्य कार्यवाहकविदेशमन्त्री ले होइ टुङ्ग् इत्यस्मै अभिनन्दनानि प्रेषितवान्। सामाजिकमाध्यमेषु मन्त्री अवदत् यत् भारत-वियतनामदेशयोः रणनीतिकसाहचर्यं निरन्तरं दृढं दृढतरं वर्धमानम् अस्ति।

**॥ इति वार्ताः॥**